# Shri Bala Stavaraja 1

# શ્રીબાલાસ્તવરાજઃ ૧

## Document Information

Text title : Shri Bala Stavaraja 1

File name : bAlAstavarAjaH1.itx

Category : devii, dashamahAvidyA, devI, stavarAja

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાસ્તવરાજઃ ૧

શ્રીમતઃ પરમેશતલ્પનિલયે વન્દારુવૃન્દાનુતે
    સિન્દૂરદ્રવકુઙ્કુમોદકજપાપુષ્પપ્રભે મઙ્ગલે ।
શ્રીબીજેન સમન્વિતં તવ મનું ભક્ત્યા જપન્તં સદા
    ભક્તં મામવલોકયાશુ કૃપયા લક્ષ્મ્યા સહૈવામ્બિકા ॥ ૧॥

ઐમિત્યક્ષરમમ્બિકે શશિનિભં બાલાર્કકોટ્યુજ્જ્વલે
    બાલાનામપિ વાગ્વિજૃમ્ભણપટુપ્રખ્યાતવિદ્યાપ્રદમ્ ।
બીજં બિમ્બવિડમ્બિદન્તિરદને વિદ્યામુખે સર્વદા
    બાલાયાઃ કલયામિ કલ્પલતિકે ભક્તિપ્રસન્ને શિવે ॥ ૨॥

ક્લીમિત્યેકમહેશમાનિનિ સદા મન્દસ્મિતે મઙ્ગલે
    બન્ધૂકારુણપાણિપલ્લવલસત્પુણ્ડ્રેક્ષુપાશોજ્જ્વલે ।
નાનારત્નવિભૂષિતે સુરનુતે રત્નામ્બરાલઙ્કૃતે
    ત્વદ્રૂપં હૃદિ ચિન્તયામિ સતતં સર્વાર્થસિદ્ધિપ્રદમ્ ॥ ૩॥

સૌવર્ણં કમલાસનસ્ય દયિતે વૈશ્વાનરાર્ચિર્મયી
    કર્પૂરોજ્જ્વલવીટિકાપરિલસદ્બિમ્બાધરોદ્યન્મુખે ।
સાધારે ચ તુરીયયા ચ પરયા સમ્પૂજિતાઙ્ઘ્રિદ્વયે
    યસ્ત્વાં ધ્યાયતિ મન્ત્રવર્યમસકૃજ્જપ્ત્વાપિ વાગ્મી ભવેત્ ॥ ૪॥

ઐં ક્લીં સૌઃ સકલાપદાર્તિશમનં તાર્તીયખણ્ડોગ્રગં
    યો વા ભક્તિપુરસ્સરો મૃદુભુજે સૌવર્ણપીઠોજ્જ્વલે ।
કામેશે કલયામિ કુન્દરદને કન્દર્પબીજોજ્જ્વલે
    મન્ત્રં તે મદભીષ્ટદં દિનકરજ્યોતિર્મયં સર્વદા ॥ ૫॥

કલ્યાણં તવ રૂપમમ્બરમણીદૃષ્ટ્યા કુચત્વં ગતૌ
    ચન્દ્રો વિસ્મિતજાલમીશવનિતે તાદ્યસ્તસૈન્યં ગતા ।
ત્વદ્રૂપં કિમુ તર્પયામિ વદ મે કન્દર્પવિદ્યાત્મિકે
    કામેશોઽપિ તવાવલોકનવશાદર્ધાઙ્ગનાત્વં ગતઃ ॥ ૬॥

એતામેવ વિભાવયન્તિ મુનયઃ સાયુજ્યમુક્તિપ્રદાં
    એકાન્તે રવિમણ્ડલેભ્યવલયે હેમાદ્રિર્ષૃઙ્ગે બુધૌ ।
આનન્દામૃતસિન્ધુમગ્નહૃદયા રોકુગ્ચમાનોભવા
    ત્વાં દેવીમનુચિન્તયામિ સતતં ચિત્તે ભજે મામકે ॥ ૭॥

લક્ષ્મીપ્રદાનસમયે નવવિદ્રુમાભાં
    વિદ્યાપ્રદાનસમયે શરદિન્દુશુભ્રામ્ ।
વિદ્વેષિવર્ગવિજયે ચ તમાલનીલાં
    બાલાં ત્રિલોકજનનીં શરણં પ્રપદ્યે ॥ ૮॥

ઇતિ શ્રીબાલાસ્તવરાજઃ ।

જયતુ જયતુ બાલા ભારતી બ્રહ્મરૂપા
જયતુ જયતુ બાલા વૈષ્ણવી વિષ્ણુરૂપા ।
જયતુ જયતુ બાલા રૌદ્રિણી રુદ્રરૂપા
જયતુ જયતુ બાલા ચિન્મયી જ્ઞાનરૂપા ॥

હૃત્પુણ્ડરીકાનનભાસમાના
    ચિત્કુણ્ડલી ચઞ્ચદુદારમાના ।
પુસ્તાક્ષસૂત્રસ્ફુરદબ્જહસ્તા
    બાલા ધિયં યચ્છતુ નઃ પ્રશસ્તા ॥

ઇતિ શ્રીબાલાસ્તવરાજઃ (૧) સમ્પૂર્ણઃ ।

Proofread by PSA Easwaran

---

*Shri Bala Stavaraja 1*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*